# Sanandanadi Yogibhih Kritam Vishnu Stotram

# સનન્દનાદિ યોગિભિઃ કૃતં વિષ્ણુસ્તોત્રમ્

## Document Information

Text title : Sanandanadi Yogibhih Kritam Vishnu Stotram

File name : sanandanAdiyogibhiHkRRitaMviShNustotram.itx

Category : vishhnu, vishnu, viShNupurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : viShNupurANa | adhyAya 4/30-44||

Latest update : October 2, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 2, 2024

*sanskritdocuments.org*

# સનન્દનાદિ યોગિભિઃ કૃતં વિષ્ણુસ્તોત્રમ્

તં તુષ્ટુવુસ્તોષપરીતચેતસો લોકે જને યે નિવસન્તિ યોગિનઃ
સનન્દનાદ્યા હ્યતિનમ્રકન્ધરા ધરાધરં ધીરતરોદ્ધતેક્ષણમ્ ॥ ૩૦॥

સનન્દનાદ્યા યોગિન ઊચુઃ ।
જયેશ્વરાણાં પરમેશ કેશવ પ્રભો ગદાશઙ્ખધરાસિચક્રધૃક્
પ્રસૂતિનાશસ્થિતિહેતુરીશ્વરસ્ત્વમેવ નાન્યત્પરમં ચ યત્પદમ્ ॥ ૩૧॥

પાદેષુ વેદાસ્તવ યૂપદંષ્ટ્રા દન્તેષુ જજ્ઞાશ્ચિતયશ્ચ વક્ત્રે ।
હુતાશજિહ્વોઽસિ તનૂરુહાણિ દર્ભાઃ પ્રભો યજ્ઞપુમાંસ્ત્વમેવ ॥ ૩૨॥

વિલોચને રાત્ર્યહની મહાત્મન્સર્વાશ્રયં બ્રહ્મપરં શિરસ્તે ।
સૂક્તાન્યશેષાનિ સટાકલાપો ઘ્રાણં સમસ્તાનિ હવીંષિ દેવ ॥ ૩૩॥

સ્રુક્તુણ્ડસામસ્વરધીરનાદપ્રાગ્વંશકાયાખિલસત્રસન્ધે ।
પૂર્તેષ્ટધર્મશ્રવણોઽસિ દેવ સનાતનાત્મન્ભગવન્પ્રસીદ ॥ ૩૪॥

પદક્રમાક્રાન્તભુવં ભવન્તમાદિસ્થિતં ચાક્ષરવિશ્વમૂર્તે ।
વિશ્વસ્ય વિદ્મઃ પરમેશ્વરોઽસિ પ્રસીદ નાથોઽસિ પરાવરસ્ય ॥ ૩૫॥

દંષ્ટ્રાગ્રવિન્યસ્તમશેષમેતદ્ભૂમણ્ડલં નાથ વિભાવ્યતે તે ।
વિગાહતઃ પદ્મવનં વિલગ્નં સરોજિનીપત્રમિવોઢપઙ્કમ્ ॥ ૩૬॥

દ્યાવાપૃથિવ્યોરતુલપ્રભાવ યદન્તરં તદ્વપુષા તવૈવ ।
વ્યાપ્તં જગદ્વ્યાપ્તિસમર્થદીપ્તે હિતાય વિશ્વસ્ય વિભો ભવ ત્વમ્ ॥ ૩૭॥

પરમાર્થસ્ત્વમેવૈકો નાન્યોઽસ્તિ જગતઃ પતે ।
તવૈષ મહિમા યેન વ્યાપ્તમેતચ્ચરાચરમ્ ॥ ૩૮॥

યદેતદ્દૃશ્યતે મૂર્ત્તમેતજ્જ્ઞાનાત્મનસ્તવ ।
ભ્રાન્તિજ્ઞાનેન પશ્યન્તિ જગદ્રૂપમયોગિનઃ ॥ ૩૯॥

જ્ઞાનસ્વરૂપમખિલં જગદેતદબુદ્ધયઃ ।

અર્થસ્વરૂપં પશ્યન્તો ભ્રામ્યન્તે મોહસમ્પ્લવે ॥ ૪૦॥

યે તુ જ્ઞાનવિદઃ શુદ્ધચેતસસ્તેઽખિલં જગત્ ।
જ્ઞાનાત્મકં પ્રપશ્યન્તિ ત્વદ્રૂપં પરમેશ્વર ॥ ૪૧॥

પ્રસીદ સર્વ સર્વાત્મન્ભવાય જગતામિમામ્ ।
ઉદ્ધરોર્વીમમેયાત્મઞ્છન્નો દેહ્યબ્જલોચન ॥ ૪૨॥

સત્ત્વોદ્રિક્તોઽસિ ભગવન્ ગોવિન્દ પૃથિવીમિમામ્ ।
સમુદ્ધર ભવાયેશ શન્નો દેહ્યબ્જલોચન ॥ ૪૩॥

સર્ગપ્રવૃત્તિર્ભવતો જગતામુપકારિણી ।
ભવત્વેષા નમસ્તેઽસ્તુ શન્નો દેહ્યબ્જલોચન ॥ ૪૪॥

ઇતિ વિષ્ણુપુરાણે પ્રથમભાગે ચતુર્થાધ્યાયાન્તર્ગતં
સનન્દનાદિ યોગિભિઃ કૃતં વિષ્ણુસ્તોત્રં સમાપ્તમ્ ।

વિષ્ણુપુરાણ । અધ્યાય ૪/૩૦-૪૪॥

viShNupurANa . adhyAya 4/30-44..

Proofread by PSA Easwaran

---

*Sanandanadi Yogibhih Kritam Vishnu Stotram*

pdf was typeset on October 2, 2024

Please send corrections to *sanskrit@cheerful.com*